North Asian International Research Journal of Multidisciplinary

IRJIF IMPACT FACTOR:6.019

ISSN: 2454-2326 Vol.9, Issue-11 November-2023

Index Copernicus Value: 58.12 Thomson Reuters ID: S-8304-2016

NAIRJC *A Peer Reviewed Refereed Journal*

DOI: 10.5949/nairjmd.2023.10.11.2

# द्वारमानमीमांसा

रौनक

शोध छात्रा (वास्तुशास्त्र विभाग)

श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय

नई दिल्ली- ११००१६

*Email- ronakmond8890@gmail.com*

मनुष्याणां मूलभूतावश्यकतास्वावासव्यवस्थाऽपि एका महत्त्वपूर्णावश्यकता वर्तते , एतच्च न तु मात्रमनुष्याणां कृते अपितु पशुपक्षिणां कृतेऽपि आवासव्यवस्थायाः महत्त्वं मन्यते। सर्वे जीवन्तप्राणिनो स्वसूरक्षणार्थम् आवासस्य निर्माणं कुर्वन्ति , एतेषु च मनुष्याः अतीवबुद्धिशीलाः विवेकिनश्च मन्यते , यतोहि आदिकालादेव मनुष्याः स्वसुरक्षायै सुविधायै च आश्रयस्थानानाम् अन्वेषणं कृतवन्तः। सर्वप्रथमं मनुष्याः प्राकृतिकावासस्थानानां परिकल्पनां कृतवन्तः यथा- गुहा , कन्दरा वा , परञ्च तत्र द्वाराद्यभावात् मनुष्याः स्वकौशलेन स्वयमेव कृत्रिमावासस्य निर्माणं कुतवन्तः , शनैः शनैश्च एतन्निर्माणं गृहनिर्माणस्य विशिष्टकलायां विपरिणतं, भवनादिनिर्माणस्य सिद्धान्तैर्परिपुष्टं भूत्वा "**वास्तुशास्त्र**" नाम्ना प्रसिद्धिर्जाता।

"**वास्तु**" शब्दस्य तात्त्पर्यः निवासस्थानात् विज्ञायते , अस्य च शब्दस्य व्युत्पत्तिः निवासार्थक वस् धातोः जाताः। अतः वास्तुशब्दस्यार्थः यत् स्थानं यत्र प्राणिनः निवसन्ति विशेषरूपेण प्राणिनः इत्यत्र मनुष्याः तैव स्वकौशलेन बुद्ध्या वा भवननिर्माणं कर्तुं शक्नुवन्ति। अथवा भवननिर्माणस्य योग्या भूमिरेव " **वास्तु**" इत्यर्थः। भूमेः शुभाशुभ परीक्षणं भवननिर्माणस्य च विधिप्रतिपादयिता शास्त्रं "**वास्तुशास्त्रम्**"।

वास्तुशास्त्रे दिशः देशस्य च अनुरूपं ग्रहनिर्माणस्य विधानां विवेचनं जातम्। प्राकृतिकशक्तिपञ्चमहाभूतानाञ्च तारतम्यः तेषाञ्च समुच्चितप्रबन्धैः प्राणिनाः शारीरिकमानसिकक्षमतासु वृद्ध्या सहैव स्वस्थगतिशीलत्वोद्देश्येन वास्तुनिर्माणस्य मानकसिद्धान्तानां प्रतिपादनं वास्तुशास्त्रे प्राचीनाचार्यैः कृतम्। तेषु सिद्धान्तेष्वेव द्वारस्थापनायाः मुख्यसिद्धान्तं प्रस्तुतम्।[1]

वास्तुक्षेत्रे सुरक्षायै व्यवधानरहितावागनाय वायोश्च संचरणाय वास्तुशास्त्रे द्वाराणां गवाक्षादीनाञ्च विशद प्रतिपादनं जातम्। द्वारस्थापना कदा कुत्र च भवेतित्यस्मिन् विषये वास्तुशास्त्रे विस्तृतरूपेण चर्चा जाता। वास्तुशास्त्रानुसारं गृहनिर्माणे द्वारस्य विशेषतया महत्त्वं जायते यतोहि गृहे सकारात्मकोर्जायाः प्रवेशः अन्यच्च अवागनादि-भौतिकदैविककार्याणां प्रवेशः गृहस्थ मुख्यद्वारेणैव भवतीत्यर्थः। वास्तुशास्त्रानुसारं गृहस्य निर्माणं पूर्णं न मन्यते यदा पर्यन्तं गृहस्य मुख्यद्वारस्याकारपरिमाणस्य च सम्यक्-पूर्तिः न जायते , यतोहि परिवारस्य सुखदुखादीनां स्मृद्धीनाञ्च सम्बन्धः मुख्यद्वारस्य स्थापनया जायते।

द्वारं कस्यचिद्भवनस्य सुरक्षायै प्रमुखाङ्गः मन्यते। एकप्रकोष्ठतः द्वितीयप्रकोष्ठं प्रति गमनाय द्वाराणि संयुज्यते, द्वारं गृहस्य अन्तरङ्गविभागान् सयोजयति। अतः गृहद्वारस्य निर्माणं सदैव शास्त्रीयदृष्ट्या कर्त्तव्यम् , यदि मानानुसारं द्वारस्य संयोगं निर्माणञ्च न भवति तु दुखराजभयादीनामुत्पत्तिर्जायते।

वास्तुशास्त्रे द्वारनिर्माणविषये केषाञ्चिद्गुणानां दोषानाञ्च वर्णनं जायते यथोक्तम्सुस्थिरसुन्दर चतुरस्र-कान्त-ऋहजुद्रव्यैश्च संयुक्तं द्वारम् उच्चकोटयाः मन्यते उत्तमो वा मन्यते। अत्युच्चद्वारं राजभयदायकं , अतिनीच-द्वारञ्च चौर्यदायकं , कुब्जद्वारञ्च कुलपीडादायकं भवतीत्यर्थः। अन्यच्च द्वारस्य स्वतः उद्घाटनं स्वतः अवधानञ्च, उन्मादकरः कुलविनाशकश्च भवतीत्यर्थः।

क्षीरार्णवग्रन्थानुसारं द्वारमानमेवमुक्तम्- एकहस्तपरिमितं प्रासादं षोडशाङ्गुलोच्चद्वारं निर्मात्तव्यं , एवं षोडशाङ्गलस्य वृद्धिः चतुर्हस्तपरिमितं कर्तव्यं , पञ्चमात् दशहस्तपरिमित प्रासादं प्रत्येकस्मिन् हस्ते

चतुश्चतुरङ्गलस्य वृद्धिः, एकादशतो विंशतिहस्तपरिमितं प्रासादं प्रत्येकहस्ते त्रयः-त्रयः अङ्गलस्य वृद्धिः एवं प्रकारेण एकैकस्यापचयनं भवेतीत्यर्थः।

उपरोक्ताद्वारमानं नागरादिजातेः प्रासादस्यावगमनीयम्। क्षीरार्णवे उक्तमानानुसारं यत् दशमं भागं हीनं क्रियते चेत् तत्स्वर्गान्मनोहरद्वारं भवतीत्यर्थः, यच्च पर्वतस्याधस्तने चतुरशिल्पिना निर्मितप्रासादस्य द्वारस्य दशमं भागं वर्द्धापयेच्चेत् तच्छुभं मन्यते इत्यर्थः।[2]

शिवालयस्य द्वारं ज्येष्ठमानस्य, सर्वजनानामाश्रयद्वारं जीनमंदिरस्य च द्वारं कनिष्ठमानस्य, सर्वदेवानाञ्च मध्यमानस्य द्वारे भवेत् यत् कल्याणप्रदः मन्यते। ज्येष्ठमानस्य द्वारं मध्यामानस्योदयात् अर्धपृथु भवेत्, मध्यमानस्य द्वारस्य चतुर्थभाग वृद्धिः, कनिष्ठस्य च द्वारे मध्यमानस्य द्वारस्य चतुर्थभागे वृद्धिः, कनिष्ठस्य च द्वारे मध्यमात् अतिपृथुः कर्तव्य। अज्ञानतया कदाचित् द्वारमानस्य पृथुता भवेच्चेत् तदापि तत्सर्वदेवेभ्यः पूजनयोग्यवत् नागरादिद्वारमानमवगमनीयम्।

**एकहस्ते तु प्रासादे द्वारं स्यात् षोडशाङ्गुलम्।**

**षोडशाङुलिका वृद्धिर्यावद्धस्तचतुष्टयम्।।**[3]

**एक हस्ते तु प्रासादे द्वार स्यात् षोडशाङ्गुलम्।**

**कार्या षोडशतो वृद्धि पर्यन्ते च चतुष्करम्।।**

**गुणाङ्गुला दृष्ट हस्तान्तं प्रयुक्ता वास्तुवेदिभि।।**[4]

उक्तमानं क्षीरार्णवे, प्रासादमण्डने च, अपराजित पृच्छाज्ञानप्रकाशदीपार्णवे च समं दीयते।[5]

मत्स्य पुराणानुसारं द्वारस्य विशालता दशधा उत्तमो मन्यते- - प्रथमं 150 अङ्गुलपरिमितं द्वारस्य विशालता भवेत्, एतदस्य चतुर्भेदाः 150 इत्यस्मिन् 10-10 अङ्गुलापचयनीयं, 140-130-120-110 अङ्गुलपरिमितद्वाराणि निर्मातुं शक्यते।[6]

विश्वकर्मा-वास्तुशास्त्रे उक्तं यत् द्वारं द्वि वा त्रिहस्तमानयुत वा उच्चतमं भवेत् दृदञ्च भवेत्।[7]

द्वारप्रमाण- बृहत्संहितानुसारं चातुर्वर्येभ्यः द्वारप्रमाणं एवं प्रकारेण दीयते-

गृहद्वारस्य पृथुतापरिमाणं (गृह पृथुता÷5+18) + (गृह पृथुता÷5+180÷8)

तथा द्वारपृथुता×3=द्वारस्य दीर्घता

उदाहरणं- गृहस्य पृथुता = 32 हस्तपरिमितम्।

अतः गृहद्वारस्य पृथुता प्रमाण = ( 32÷5+18) + (32÷5+18)÷3 =27.45 अतः स्वल्पान्तरात् 27 गृह्यते 27×3 = 81 अङ्गलपरिमितं द्वारस्य पृथुता।[8]

**विशेष-** उपर्युक्त प्रकारैः गृहद्वारस्य दीर्घता 81 अङ्गुलपरिमितं जातं अर्थात् पर्यायशः 5 फीट इत्यस्मिन् आधारे पृथुता। फीट 8 इंच परिमितं प्राप्यते , एवं प्रकारेण द्वारस्य दीर्घता पृथुता च तर्कसङ्गतायुता न दृश्यते , वस्तुतः द्वारस्य पृथुतायां गृहस्य पृथुतां अङ्गुत्मकं विज्ञाय योजयेत् , तदा द्वारपृथुता- 27+32 = 59 अङ्गुलपरिमितं, 3 फीट 9 ईंच वा पर्यायशः भविष्यति , द्वारदीर्घता इत्यस्मात् त्रिगुणं 11 फीट वा पर्यायशः भविष्यति परञ्च वर्तमानपरिस्थितिवशात् उपर्युक्त दीर्घता किञ्चिदधिकं जायते, अतः त्रिगुणितस्य स्थाने द्विगुणितमिति समुच्चितं प्रतीयते। तदनुसार दीर्घता 7 फीट 6 ईंच प्राप्यते , अयं मापः समसामयिकं जायते। अतः सम्प्रति एतदेव मानं ग्रहणीयम्।

एवं प्रकारेणैव मत्स्यपुराणस्य गृहमाननिर्णयाध्यायानुसारं-

गृहद्वारस्थ पृभुतापरिमाण- (गृहपृथुता÷5+18)

तथा द्वारपृथुता×2 = द्वारस्य पृथुता दीर्घता वा।

उदाहरणं ब्राह्मणगृहस्य पृथुता = 32 हस्तपरिमितं।

अतः गृहद्वारपृथुता परिमाणं- (32÷5+18) = 24 अङ्गलं,

स्वल्पान्तरात् 2×2=4 फीट पर्यायशः द्वारस्य पृथुता दीर्घता वा।[9]

**विशेष-** उपर्युक्तमानं व्यवहारिकं, वस्तुतः द्वारपृथुतायाः सूत्रे गृहपृथुतायाः योगगति आवश्यकं , तदा द्वारपृथुता - 24+32=56 अङ्गुलं 3 फीट 6 ईंच अतः द्वारस्य दीर्घता 56×2=112 अङ्गुल, अथवा 7 फीट भविष्यति।

बृहत्संहितानुसारं चातुर्वर्ण्यादरिक्तं राजा - सैनानायकेभ्यः द्वारपरिमाण निम्न अस्ति।

गृहद्वार दिर्घता परिमाण (गृहपृथुता + गृहपृथुता 11+70)

तथा द्वारपृथुता = द्वारस्य उच्चता÷ 2।[10]

**उदाहरण-** राज्ञः गृहस्य पृथुवा = 108 हस्तपरिमितं भवेत्।

अतः तहद्वारोच्चता परिमाण ( 108+108÷11+70) =177 अङ्गुलं पर्यायशः आधुनिकभानात् 11फीट 9 ईंच द्वारपृथुता= 177÷2 94 अङ्गुल पर्यायशः 6 फीट।

## द्वारस्थापनायाः केचिन्महत्त्वपूर्णबिन्दवः-

पृथुतायां दीर्घतायाञ्चैव द्वारस्य निर्माणं शुभं भवति। कोणेषु द्वारस्थापनम् अशुभ मन्यते। [11]

भीतिमध्येऽपि सम्मुखस्थापना न कृर्तव्यमिति। द्वारस्य सम्मुखं द्वारं न निर्मातव्यम्। [12]

मार्ग-वृक्ष-कोण-कूप-स्तम्भ-जलमार्गादीनाञ्च समक्षे द्वारनिर्माणं न भवेत्।[13]

एवं निर्माणत्वाद् द्वारवेध-दोषो जायते। परञ्च द्वारस्य उच्चतायाः द्विगुणान्तराले उपरोक्त मार्गादयः भवे भवेच्चेत् द्वारवेधः दोषकारकः न भवति।[14]

बृहत्संहितानुसारं द्वारवेधे सति शुभाशुभफलं निम्नप्रकारान्तरेण ज्ञातव्यम्।[15]

## द्वारमानम्-

क्षुद्रमध्यम श्रेष्ठ द्वाराणां विस्तृतप्रमाणमेवं प्रकारेण भवति, क्षुद्रद्वारस्थ पृथुता साद्धैकात् प्रारभ्य पञ्चहस्तपर्यन्तं 6-6 अङ्गुलं वर्द्धापयन् नेतव्यं , मध्यमद्वारस्य पृथुता द्विहस्तत्वात् प्रारब्भ्य नवहस्तपर्यन्तं द्वादशाङ्गुलं क्रमात् वर्द्धापयन् नेतव्यम् , एवं प्रत्येक द्वाराणां पञ्चदशप्रमाणाः पृथग्पृथक् प्राप्यते। विस्तारानुसारं तेषां उच्चता प्राप्यते।[16]

तथा तेषां दीर्घता (उच्चता) क्रमशः पृथुतायाः पञ्चमभागात् सप्त-सप्तभागात् दशभाग , द्विगुणं, सार्द्धद्विगुणं सवादद्विगुणं भवेत् एते कचप्रमाणाः उच्चतायाः कथिताः।[17]

समराङ्गणसूत्रधारे उक्तं यत् प्रासादेषु चतुर्पञ्चाशदंशसहितं त्रिहस्तपरिमितं प्रमाणेन द्वारस्योदयमानं कथितम् , अन्यच्च तस्य उद्यस्यार्ध प्रमाणमात्र द्वारस्थ पृथुता भविष्यति उक्तोदयमानं त्रिषु विभक्तानां समद्वाराणां स्तम्भस्य पिण्डं प्रशस्तं भविष्यति।[18]

## राजवल्लभमण्डने प्रमाणदृष्ट्या द्वारं त्रिधा-

1. **उत्तमद्वारं-**

गृहविस्तारतुल्यतायां हस्ताङ्गुले 70पृथुतार्धे 1 संयोगत्वात्

अङ्गुनसंयोगत्वात् प्राप्त संख्या।प्राप्त संख्या।

2. **मध्यमद्वारं-**

गृहविस्तारतुल्यतायां हस्ताङ्गुलेपृथुतायाः त्रिभागापचयनम्।

60 संयोगत्वात् प्राप्तसंख्या।

3. **कनिष्ठद्वारं-**

गृहविस्तारतुल्यतायां 50 संयोगत्वात्दीर्घगयाः अर्धम्।

प्राप्तसंख्या।

## एवं प्रकारेण प्रवेशद्वारस्यापि भेदत्रयमुक्तम्-

१. जोष्ठ प्रतोली (प्रवेशद्वारं) - (15 हस्तोच्च 8 हस्त पृथु)।

२. 13 हस्तोच्च, 7 हास्त पृथु।

३. कनिष्ठप्रतोली (11 हस्तोच्च, 6 हस्त पृथु) मन्यते।

ज्येष्ठ उत्येधमानाय गृहविस्ताराय 16 तमे भागे 4 हस्त संयोगत्वात् सामान्य-ज्येष्टमानं प्राप्यते। इत्यस्मिन् 20, 13, 16 अङ्गुल संयोगत्वात् ज्येष्टोत्सेधस्थापि ज्येष्ठमध्यमकनिष्ठभेदाः प्राप्यन्ते।[19]

**वास्तुमञ्जरीग्रन्थेऽपि राजवल्लभ इव समं मानमुक्तं द्वारस्य-**

**पञ्चाश सप्ततिः षष्ठी व्यास हस्तमिताङ्गुलैः।**

**मिश्रती गृहशालायां द्वार चैव प्रकारयेत् ।।**[20]

राजा सेनापतेः च भवनस्य प्रच प्रधानद्वारं 188 अङ्गुलोच्च भवेत् , एवं मनीषिणां कथनम्। विमर्श-दीर्घार्धं 188/2=94 अङ्गुलं राजद्वारस्य उच्चता भवेत्।

ब्राह्मणगृहस्य द्वारपृथुता 27 अङ्गुलपरिमितं भवति द्वारस्योच्चता त्रिगुणं भवेत् पृथुतायाः , 27x3 = 81 अङ्गुलपरिमितं भवेदित्यर्थः।[21]

**उपसंहारः**

मनुष्याणां मुलभुतावश्यकतासु अन्न-वस्त्र-गृहवासेत्यादयः सन्ति येषु आवासः मनुष्यणां जीवनस्य कृते , अपितु पशुपक्षिणामयि कृते अतीवमहत्वपूर्णः सुरक्षायुक्तश्च विज्ञायते। आवासः यत् स्थानं यस्मिन् वयं सुरक्षिताः अनुभवामः। आवासोऽपि असुरक्षितो मन्यते यदापर्यन्तं द्वाराणि न भवेतः , अर्थात् आवासे सुरक्षितरूपेण निवसनार्थं द्वाराण्यावश्यकानि इत्यर्थः। वास्तुशास्त्रानुसारं गृहद्वारं न तु मात्रजनानां गमनागमनस्य साधनम् अपितु तद् द्वारं गृहे सफलताया असफलतायाश्चापि द्वारम्। प्राचीनवास्त्वाचार्याणां मतमिदं यत् भवनस्य निर्माणं शास्त्रसम्मतत्वादपि यदि गृहस्य द्वारं निषिद्धस्थाने भवति चेत् गृहे निवसन्तः जनानां कृते परिवार सदस्यानां वा कृते विविधविघ्नोत्वतिकारकं भवति , अतः भवनद्वारस्य निर्माणं दत्तचित्तेन कौशलतापूर्वकं कर्त्तव्यं। द्वारमानम् उत्तम-मध्यम-कनिष्टं च कथ्यते। ब्राह्मण-क्षत्रिय-वैशयानाञ्च कृते द्वारमानं भिन्नत्वादुक्तं , बृहत्संहितानुसारं राजा सेनापतेश्च कृतेऽपि भिन्नत्वादुक्तं द्वारमानम्। क्षीरार्णवं प्रासादमण्डनं, अपराजितपृच्छा, एतेषां द्विरमानं समं, परञ्च वास्तुमञ्जर्याः किञ्चिद्भिन्नमिति।

## सन्दर्भ

[1]. द्वारस्थापनायाः वासुशास्त्रीय सिद्धान्त- डॉ. अशोक थपलियाल

(वास्तुशास्त्रविमर्श पञ्चमं पुष्पं)

[2]. सुप्रभानाम्नीगुजरातीटीका द्वारामान, पृ. 61 (क्षीरारर्णवग्रन्थस्य टीका)

[3]. प्रासादमण्डन- पृ. 82 श्लोक 43 नागरप्रसादद्वारमानम्।

[4]. अपराजितपृच्छा पृ. 742 3-सूत्र, 130 श्लोक 1-4

[5]. सूत्र 130 तुलनीय ज्ञानप्रकाशदीपार्णव 6/2-3

[6]. शिन्पदीपकः पृ.54

[7]. 26/17 विश्वकर्मा वास्तुशास्त्र।

[8]. वृ.सं. 52/251

[9]. वास्तुशास्त्र पृ० 50 वा. वि. पृ. श्लोक 15

[10]. वृ.स. 52/54

[11]. वृ.वा.मा.पृ 90 श्लोक 148

[12]. तत्रैव

[13]. वृ.स. 52/74

[14]. मु.मा. 6/10

[15]. वृ.स. 52/75-76 वास्तुशास्त्रविमर्शः पृ 46, डॉ अशोकथपलियाल।

[16]. मयगतम्- पृ. 308, श्लोक- 21-22 अध्याय- 24

[17]. मयगतम्- पृ. 309, 24 अध्याय।

[18]. समराङ्गणसूत्रधार त्रिशोऽध्यायः श्लोक- 122-123

[19]. श्री-सूत्रधारमण्डनविरचितं राजवल्लभमण्डनम् पञ्चमाध्यायः पृ. 27

[20]. वास्तुमन्जरी पृ. 71, श्लोक सं. 20

[21]. विश्वकर्माप्रकाश  द्वितीयाध्याय, श्लोक 162-163